## शुण्डिकादिभ्योऽण् । (७६/१४८८)

[1]शुण्डिक इत्येवमादिभ्यः [2]प्रातिपदिकेभ्यः अण् प्रत्ययो भवति ततः आगतः इत्येतस्मिन् विषये । आयस्थानठकोऽपवादः । शुण्डिकादागतः शौण्डिकः । कार्कणः । अण्ग्रहणं बाधकबाधनार्थम्[3] । औदपानः ।

शुण्डिक । कृकण । स्थण्डिल । उदपान । उपल । तीर्थ । भूमि । तृण । पर्ण । शुण्डिकादिः ॥

## विद्यायोनिसम्बन्धेभ्यो वुञ् । (७७/१४८६)

विद्यायोनिकृतः सम्बन्धो येषां ते विद्यायोनिसम्बन्धाः । तद्वाचिभ्यः [4]शब्देभ्यो वुञ् प्रत्ययो भवति तत आगतः इत्येतस्मिन् [5]विषये । अणोऽपवादः । छं तु परत्वाद् बाधते । विद्यासम्बन्धेभ्यस्तावत् – उपाध्यायादागतं औपाध्यायकम् । [6]शैष्यकम् । आचार्यकम् । योनिसम्बन्धेभ्यः – [7]मातामहकः । पैतामहकः । मातुलकः ॥

## ऋतष्ठञ् । (७८/१४८७)

विद्यायोनिसम्बन्धेभ्यः इत्येव । ऋकारान्तेभ्यः प्रातिपदिकेभ्यो विद्यायोनिसम्बन्धवाचिभ्यः ठञ् प्रत्ययो भवति तत आगतः इत्येतस्मिन् विषये । वुञोऽपवादः । विद्यासम्बन्धवाचिभ्यस्तावत् – होतुरागतं हौतृकम् । पौतृकम् । योनिसम्बन्धवाचिभ्यः – [8]भ्रातृकम् । स्वासृकम् । [9]मातृकम् । तपरकरणं मुखसुखार्थम्[10] । विद्यायोनिभ्यामन्यत्र, '[11]सावित्रम्' (तै. सं. १.८.२.१) ॥

## पितुर्यच्च । (७९/१४८८)

पितृशब्दाद् यत् प्रत्ययो भवति, चकाराट् ठञ् च तत आगतः इत्येतस्मिन् विषये[12] । पितुरागतं पित्र्यम्, [13]पैतृकम् ॥

## गोत्रादङ्कवत् । (८०/१४८९)

अपत्याधिकारादन्यत्र लौकिकं [14]गोत्रमपत्यमात्रं गृह्यते । गोत्रप्रत्ययान्तात् प्रातिपदिकाद् [15]अङ्कवत् प्रत्ययविधिर्भवति ततः आगतः इत्येतस्मिन् [16]विषये । अङ्कग्रहणेन [17]तस्येदमर्थसामान्यं लक्ष्यते । तस्माद् [18]वुञतिदिश्यते, न अण्[19], 'सङ्घाङ्कलक्षणेष्वञ्यञिञामण्' (४.३.१२७/१५०७) इति । औपगवानामङ्कः औपगवकः । कापटवकः । नाडायनकः । चारायणकः । एवम् औपगवेभ्य आगतम् औपगवकम् । कापटवकम् । नाडायनकम् । [20]चारायणकम् ॥

---

1. शुण्डिका ब. ह. 2. शब्देभ्यः क. ह. 3. उदपानशब्दस्य उत्सादिपाठात् अञ्, तदपवादः आरभ्यते इत्यधिकम् ड. 4. प्रातिपदिकेभ्यः ब. 5. अर्थे फ. 6. शैष्यकः आचार्यकः फ. 7. मातामहकम् पैतामहकम् मातुलकम् ड, मातुलकः नास्ति क. 8. नास्ति फ. 9. मातुरागतम् इत्यधिकम् फ. 10. न त्वयं तात्परः असंभवात् इत्यधिकम् ह, तकारः मुखसुखार्थः ड. फ. ह. 11. नास्ति ह. 12. वुञोऽपवादः इत्यधिकम् फ. 13. पक्षे योनिसम्बन्धात् पैतृकम् क. इ. ड. 14. अपत्यमात्रं गोत्रं गृह्यते क. 15. अङ्क इव ड. 16. अर्थे ह. 17. तस्य इदम् लक्ष्यते ड. 18. वुञप्यतिदिश्यते ब. क. ड. फ. 19. एव इत्यधिकम् ब. ह. 20. नास्ति ड.